No. ११६७ घ

Title गायत्री स्तोत्रम्

Author विद्यारण्यमुनिः

Extent ३ Age सं. १८६२

Subject स्तोत्रम् भक्तिः



गायत्री स्तोत्रम्

११६७ 3

॥श्रीगणेशायनमः॥ अथगायत्रीस्तोत्रलि
खितं॥ ॐकारस्यत्रयोरूपंश्वेतपीतंचलोहितं
चक्षुर्दृष्टिकरंपापंॐकारंदहतेक्षणं॥१॥ तका
रंपंचवर्णंचब्रह्माविष्णुशिवार्चितं॥ ब्रह्महत्याकृ
तंपापंतकारंदहतेक्षणं॥२॥ सकारंश्वेतवर्णंच
केशवेनसदार्चितं॥ गोहत्याकृतंपापंसकारंद
हतेक्षणं॥३॥ विकारंलोहितंवर्णंशंकरेणसदार्चि
तं॥ स्त्रीहत्याकृतंपापंविकारंदहतेक्षणं॥४॥
तुकारंहेमवर्णंचमनुदेवेनसदार्चितं॥ योनिदोषं

कृतं पापं तु कारं दहते क्षणं ॥ ५ ॥ वकारं घनवर्णं च ग
णेशेन समर्चितं ॥ सुरापान कृतं पापं वकारं दह
ते क्षणं ॥ ६ ॥ रेकारं रक्तवर्णं च श्रीसूर्येन समर्चि
तं ॥ गुरुस्त्रीगमन पापं रेकारं दहते क्षणं ॥ ७ ॥
णकारं क्षीरवर्णं च पार्वत्यं च समर्चितं ॥ स्वा
न स्पर्श कृतं पापं णकारं दहते क्षणं ॥ ८ ॥ नकारं के
तुकी वर्णं देवराज समर्चितं ॥ संसर्गदोष कृतं
पापं नकारं दहते क्षणं ॥ ९ ॥ गोकारं कपिलवर्णं
च वामेनैव समर्चितं ॥ उपनिंदा कृतं पापं गोका । १

न

रं दहते क्षणं ॥ १० ॥ देकारं मालतीवर्णं नीलकंठ
सदार्चितं ॥ मातृगमनकृतं पापं देकारं दहते क्ष
णं ॥ ११ ॥ वकारं मधुवर्णं च धरणीधरसदार्चितं
॥ भूस्नानं न कृतं पापं वकारं दहते क्षणं ॥ १२ ॥ स
कारं श्वेतवर्णं च ईश्वरेण सदार्चितं ॥ पशुहत्याकृ
तं पापं सकारं दहते क्षणं ॥ १३ ॥ धिकारं सुक्ष्मव
र्णं च नारायण सदार्चितं ॥ बालहत्याकृतं पापं
धि धिकारं दहते क्षणं ॥ १४ ॥ मकारं धूम्रवर्णं च अर्चि
तं यमदेवता [illegible] कृतं पापं मकारं दहते क्ष

णं॥१५॥ हिकारं नाम वर्णं च प्रद्युम्नेन सदार्चितं॥ वि
ध्यापराधकृतं पापं हिकारं दहते क्षणं॥१६॥ धिका
रं हय वर्णं च मर्चितं मामि देवता॥ सुवर्णस्तेकृतं पा
पं धिकारं दहते क्षणं॥१७॥ योकारं पञ्च वर्णं च ब्र
र्चितं मुनयो मुदा॥ प्रतिग्राहिकृतं पापं योकारं द
हते क्षणं॥१८॥ योकारं निल वर्णं च योगीश्वरं स
दार्चितं॥ कार्याधियकृतं पापं योकारं दहते क्ष
णं॥१९॥ नकारं मुक्ति वर्णं च परमात्मा सदार्चि
तं॥ कर्मणायकृतं पापं नकारं दहते क्षणं॥२०॥ २

मकारं स्त्रीरवर्णं च महेश्वरसदार्चितं ॥ हृदिस्थि
तं कृतं पापं मकारं दहते क्षणं ॥ २ ॥ वोकारं हितु
वर्णं च मनुरूपाय सदार्चितं ॥ मनसा यत्कृतं पापं
वोकारं दहते क्षणं ॥ ३ ॥ दकारं शुद्धवर्णं च लक्ष्म
णेन सदार्चितं ॥ वाचया यत्कृतं पापं दकारं दह
ते क्षणं ॥ ४ ॥ याकारं यमवर्णं च किंकरेण सदा
र्चितं ॥ मेरुतुल्यं कृतं पापं याकारं दहते क्षणं ॥
५ ॥ मंजनं रक्तवर्णं च मर्वशक्रसदार्चितं ॥
पाणिपादकृतं पापं मंजनं दहते क्षणात् ॥ ६ ॥

इदं स्तोत्रं पठेन्नित्यं त्रिकालं यस्तु मानवः ॥ गायत्री
च वरं देयं सर्वसिद्धिमवाप्नुयात् ॥ २६ ॥ इति गायत्री
स्तोत्रं संपूर्णं ॥ ॥ शुभं भवतु ॥ संवत् । १८८२ शा
के १७२८ मार्गवर्तमाने वैशाषमासे शुक्लपक्षे ति
थौ एकादश्यां ॥ चन्द्रवासरे अद्येह वत्सलो ग्रामे
उदासीनदासजी बडे का विश्वरामस्तु हरिदास मे
ण लिखितं स्वस्वार्थं परमस्तु ॥ ॥ शुभमस्तु ग्रामा
हमुलजी येन आत्मपठनार्थं शुभं ॥ वलेम
ध्येयामत्रं ॥ श्रीरस्तु सर्वजगतः ॥ कल्याणमस्तु ३